# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम्** - ५ | गुणाः - ७० |
| विषयः - व्याकरणम् | **कोड** - C.E-5.3.3 | समयः - ११:०० तः २:०० |
| दिनाङ्कः - २९.११.२०१६ | सन्दर्भग्रन्थः - लघुसिद्धान्तकौमुदी | |

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ द्वयोः एकम् उत्तरयत (४)

(अ) 'कार्यम्', 'देयम्' इत्येतत् रूपद्वयं साधयत

(आ) ऋहलोर्ण्यत् इति सूत्रं व्याख्यात

प्रश्नः २ द्वयोः किमपि एकम् उत्तरयत (१२)

(क) वाऽसरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात

(ख) कृत्यप्रत्ययानां सामान्यः परिचयः लेख्यः।

प्रश्नः ३ केषाञ्चित् चतुर्णां लघूत्तराणि लिखत (४)

(क) शिष्यः इत्यत्र कः प्रत्ययः?

(ख) भोज्य-शब्दस्य कः अर्थः?

(ग) दानीयः विप्रः इत्यत्र दानीय-शब्दे ल्युट् कस्मिन् अर्थे वर्तते?

(घ) चेयम् इत्यत्र यत्-प्रत्ययः केन सूत्रेण भवति?

(ङ) कृत्य-क्त-खलर्थाः प्रत्ययाः कयोः अर्थयोः भवन्ति?

(च) 'केलिमर् उपसंख्यानम् इत्यस्य वार्त्तिकस्य एकम् उदाहरणं लेख्यम्

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ४ (अ)सुशर्मा, उखास्रत् चेति रूपद्वयं साधयत (४)

**अथवा**

(आ)कारकः, कर्ता चेति रूपद्वयं साधयत।

प्रश्नः ५ द्वयोः किमपि एकम् उत्तरयत (१२)

(क) नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इति सूत्रं सूदाहरणं व्याख्यात

(ख)पण्डितम्मन्यः, पण्डितमानी चेति द्वे रूपे ससूत्रं साधयित्वा तयोः अर्थभेदं स्पष्टयत

प्रश्नः ६ चतुर्णां लघूत्तरं लेख्यम् (४)

(क) युवोरनाकौ इति सूत्रेण वु-स्थाने किं विधीयते?

(ख) गृहम् इत्यत्र कः प्रत्ययः?

(ग) कुम्भकार-शब्दस्य कः अर्थः?

(घ) ट-प्रत्ययविधायकं किमपि एकं सूत्रं लिखत।

(ङ) श्राद्धकर-शब्दे कः प्रत्ययः?

(च) प्रियंवदः इत्यत्र कः प्रत्ययः?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ७ द्वयोः एकं रूपं साधनीयम् (४)

(क) **पचमानं** चैत्रं पश्य

(ख) चिकीर्षुः

प्रश्नः ८ द्वयोः किमपि एकम् उत्तरयत (८)

(ग) रदाभ्याः निष्ठातो नः पूर्वस्य च दः इति सूत्रं सोदाहरणं व्याख्यात

(घ) आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु इति सूत्रं सोदाहरणं व्याख्यात

प्रश्नः ९ पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि (३)

(क) विभ्राट् इत्यत्र कः प्रत्ययः?

(ख) भिक्षुः इत्यत्र केन सूत्रेण उप्रत्ययः भवति?

(ग) षाकन्-प्रत्ययान्तम् एकं शब्दं लिखत।

(घ) नेत्र-शब्दे कः प्रत्ययः?

(ङ) पक्व-शब्दे कः प्रत्ययः?

(च) दो दद् घोः इति सूत्रं किं विधत्ते?

चतुर्थी अन्वितिः (युनिट – ४)

प्रश्नः १० (अ) घञ्-प्रत्ययः केषु अर्थेषु विधीयते? सोदाहरणं विवेचयत।

**अथवा**

(आ) यजयाचयतविच्छप्रच्छरक्षो नङ् इति सूत्रं सोदाहरणं व्याख्यात (४)

प्रश्नः ११ केषाञ्चित् चतुर्णां रूपसिद्धिं ससूत्रं प्रदर्शयत (८)

(क) कृष्णं **द्रष्टुं** याति।

(ख) उप्त्रिमम्

(ग) स्तुतिः

(घ) कारणा

(ङ) **दुष्करः** कटो भवता

(च) श्रावं श्रावम्

प्रश्नः १२ पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि (३)

(क) ईषत्पानः इत्यत्र कः प्रत्ययः?

(ख) भुक्त्वा इत्यत्र केन सूत्रेण क्त्वा-प्रत्ययः भवति?

(ग) भोक्तुं कालः इत्यत्र तुमुन्-प्रत्ययः केन सूत्रेण भवति?

(घ) जयः इत्यत्र कः प्रत्ययः?

(ङ) वेपथुः इत्यत्र कः प्रत्ययः?

(च) कि-प्रत्ययान्तस्य एकम् उदाहरणं लिखत

***